# TIKA
# of
# DHARMAPALA

(Chinese Version of I-tsing, Nanjio No. 1174. Taisho Vol. 31 No. 1625. The Sanskrit rendering is based on the Nanking Edition.)

# आलम्बनपरीक्षाटीका

## आचार्यधर्मपालकृता

दुर्मेधसां प्रज्ञां परिदीपयितुमवद्याशुभानि ।
परिहर्तुश्च यो जगाद । [ तं ] प्रणम्य तदर्थं परीक्षे ।।

शास्त्रमाह । ये चक्षुरादिविज्ञानानामिति ।

हेयस्य हानमुपादेयस्य चोपादानं परीक्षाफलम् । अतो हेयं विपर्ययहेतुश्च प्रदर्श्यते । तत्रादिवचनं तानि रूपेन्द्रियाश्रितानि पञ्च विज्ञानानि सङ्गृह्णाति । परे हि प्रतिपद्यन्ते तानि प्रतिनियतवस्त्वालम्बनानि इति । मनोविज्ञानन्तु[3] न तथा । अप्रतिनियत [ विषय ]त्वात् । संवृतिसदर्थद्यालम्बनतयाऽभ्युपगमाच्च । यद्यपि मनोविज्ञानं विषयवस्तु प्रतीत्य[3a] साकारम्, तथापि विज्ञानाकारव्यभिचारि अतद्विषयमपि गृह्णाति । चक्षुरादिविज्ञानानान्तु विषयोऽव्यभिचारीति प्रसिद्धया सिद्धः । अतो नात्र प्रयासः[4] कार्यः ।।

किञ्च भावनासाध्यज्ञानवेद्यरूपस्य[5] तत्त्वतस्तर्कागोचरत्वात् दृश्यवदवस्थितत्वाच्च । तदिह श्रुतचिन्तालब्धज्ञानस्य[6] विषय इत्येव द्रष्टव्यम् । तथा मनोविज्ञानालम्बनं सर्वथा सिध्यतीति न भवति । तस्य हि स्वकालापयोर[7]नालम्बनत्वात् अतीतानागतालम्बनयोश्चासंस्कृतवदवस्तुत्वात् । अत [ $1^b$ ] आदिवचनं पञ्च विज्ञानकायान् सङ्गृह्णाति ।।

तर्हि चक्षुरादिविज्ञानोपनीतं यत्किञ्चिन्मनो विजानाति । तत्कथम् । न तदिन्द्रियविज्ञानसमकालम्[8] अनन्तरं वा । निरुद्धरूपाद्यालम्बनत्वात् । न वा वर्तमानालम्बनं तत् । इन्द्रियविज्ञानवेद्यत्वात् । मनोविज्ञानं स्वतो बाह्यार्थालम्बनस्वभावम् [ इति चेत् ] तदा अन्धबधिरादीनामभावः स्यात्[9] । अनुमानविरोधि चेन्द्रियान्तरम् । तस्याविकल्पस्य निराकर्तुमिष्टत्वात्, तथा न पुनरस्ति मनोविज्ञान आग्रहः । चक्षुरादिविज्ञानानामाश्रयमात्मानं कुर्वन् रूपमस्ति । अविज्ञप्तिस्तु अक्रियास्वभावेति[10] नास्तीयमिति स्वयमेष्टव्यम् । तथैव करणं मनः ।

आलम्बनम्

[11] प्रत्यक्षभावि । ग्राह्यस्वभावतया कुपथपरिभ्रमणात्, सम्यङ्मताय आलम्बनता प्रतिषिध्यते । तदुपादाय तदाश्रयतापि प्रतिषिध्यते । समकालीनेन्द्रियशक्तेः रूपं [12] तदिति कल्पयति ।

आह—

बाह्यार्थं इति ।

ते प्रतिपद्यन्ते तद्व्यतिरिक्तमस्ति अर्थान्तरमिति । तत् तेषां विपर्ययं प्रकाशयति । ते प्रतिपद्यन्ते अस्त्यर्थान्तरम् । तत् ग्राह्यत्वादर्थ इत्युच्यत इति ।

[12a] कथं वक्तव्यं [तत्] सङ्घातमालम्बते । सङ्घाताभावे च द्रव्यं [आलम्बनं] युज्यत इति । [तत्र] सन्ति तत्त्वतो यथाऽऽगतानि दूषणानि । किञ्च तत् स्वतः पूर्वोत्तरविरुद्धम् । मम तु का हानिः । [भवता] हि स्वीक्रियते तत् द्रव्यमालम्बते सङ्घातञ्चालम्बत इति । दोषान्तरं वक्ष्यते । अतोऽयं दोषः पुनरुपेक्ष्यते [13] ।

परमाणुं वा स्वीकुर्वन्ति ।

[२] यद्यपि परमाणवः संहता उत्पन्नमात्रनिरुद्धाः । तथापि द्रव्यमेकैकमालम्बनं न तु सङ्घातः । तद्यथा । रूपादीनि स्वेन्द्रियाणां प्रत्युपस्थितविषया अप्यसङ्कीर्णाः । तेषु इन्द्रियशक्तेः प्रतिनियतत्वात् । वस्तुषु व्यवच्छिन्नशक्तिष्वपि [14] एकैकः परमाणुरालम्बनं सिध्यति [14 a] ।

तत्कारणत्वादिति ।

तेषां चक्षुरादिविज्ञानानां कारणत्वात् । तानि अवयवार्थसन्निकर्षसमुत्पन्नानि । तथाचाहुः– [15] स आलम्बनार्थः [यः] प्रत्ययेषु विज्ञानजनकः । इति ।

तत्सङ्घातं वा इति ।

तद्वादिनो वदन्ति परमाणुकलापनिष्पन्नः सङ्घातस्तदालम्बनमिति [15 a] ।

तदाकारकविज्ञानस्य जायमानत्वात् इति ।

सङ्घातस्य तज्ज्ञानजनकत्वान्निश्चीयते स आलम्बनमिति । यथाह कश्चित्– यत्

विज्ञानं यदाकारवत्[16] सोऽस्य विषय इति। तौ द्वौ वादिना वाहतुः— [विज्ञाने] तदाकारयोगो युक्त इति।

यो[17] हेतुरुक्तः[17a—]। अस्य हेतोर्दृष्टान्तो नास्ति। तद्यथा हेत्वादिस्वभावसाधन-हेत्वादीनाम्[18]। परमाणुसामान्यलक्षणमालम्बनमित्येतत्साधयति[-17a]। यदीष्यते स्वतो न विज्ञाने बाह्यमेव वस्तु प्रत्यय इति। [तदा] धर्मिस्वरूपविरोधः[19] स्यात्। तथा धर्मोऽनभ्युपगमं[20] कीर्तयति। यत् तावत् परस्यापि सम्मतम्। तदेव दृष्टान्तीक्रियते। यत् यथेत्युच्यते। साध्येऽपि तत् सम्बन्धि भविष्यति। पूर्वप्रमाणमभिसन्धायाह—वादमूलं[21] हेतुद्वयम्, इदं हेतुप्रकाशनमात्रसाधनम्। नैवास्त्ययं हेतुः[22]। साधारणासिद्धदृष्टान्ताभावात्। अत आपतति तदाकारयोगहेतुः केन भवेदिति।

अथ पुनः प्रदर्शयति स्ववादस्य [2b] अव्यभिचारिणीं युक्तिम्। पञ्चमीनिर्देशेन[23] परसम्मतिः प्रकाशिता।

(1) यद्यपि कारणम् इति।

यथासाधारणसम्मतम्। अविद्यमान(=अनुलभ्यमान)वस्तुनामस्वभावत्वात् परमाणु-रकारणम्। यद्यपि परमाणुस्वरूपाणां तत्कारणता। [तथापि] असंहतमेवालम्बनमुच्यते।

(1 a) अतदाभतयेति।

[अ] परमाण्वाभतया इत्येतदाह।

(1 d) नेन्द्रियविज्ञप्तेरक्षवद्विषयोऽणवः इति।

यथेन्द्रियं विज्ञानसन्निकर्षाश्रयहेतुरपि न तस्या विषयः। अनिन्द्रियाकारत्वात्। तथा परमाणुरपि। ये अतदाकारा न ते तद्विषयाः इत्येतदुक्तं भवति। तदर्थमाह—

विषयो हि नाम इत्यादि।

स्वभावः स्वाकारोऽवधार्यते निश्चीयते। कथं तत्पुनरवधार्यते।

तदाकारतयोत्पत्तेरिति ।[23 a]

अस्यायमभिप्रायः । तदाकारसमानं[24] विज्ञानमुदेति । यत् तत्स्वरूपानुवर्तनं तत्तु विषयनिर्धारणमित्युच्यते । विज्ञानं विना विज्ञेयान्तरस्यासतस्तद्विज्ञानोत्पादहेतुता कथम्[25] । तथापि अस्त्येव पूर्वं विषयाकारः[26] । स तदात्मनि आदर्शे बिम्बवदर्प्यते[27] । तद्विषयनिर्धारणतया सम्मतम् । तथापि नैकैकपरमाणुस्वरूपस्याकारं विज्ञानमनुवर्तते । येन[28] परमाणुर्विषयो भवेत् ।

कारणत्वे सत्यपि इति ।

नैतावता कारणत्वेऽपि[29] आलम्बनम् ।

अक्षवत् इति ।

कारणमपि नालम्बनम् । यदि कारणत्वेनालम्बनक्रिया सम्मता । इन्द्रियमपि तद्वत् तत्साधयेत् । पूर्वोक्ततदाकारयोगहेतुरसिद्धिदुष्ट इत्यतस्तदाह । तथा चायमपिप्रायो[30] न केवलं कारणत्वम्, इन्द्रियस्यालम्बनलक्षणमपि [स्यात्] । यदि पूर्वोक्तहेतुः साधनं भविष्यति । तदा तस्य कारणत्वात् किमालम्बनता भवति । इन्द्रियस्यापि [कारणत्व] मस्ति । आलम्बनत्वं स्यात् इत्यनैकान्तिकदोषः सिद्धः ।

तथा चेत्[31] अतदाभतया इति किमर्थमिदम् ।

स्वप्रतिज्ञासंस्थापनार्थम् । न परपक्षदोषमात्रेण स्वार्थः सिध्यति । स्वविज्ञानाकाराजनकत्वात् विषयो न परमाणुश्चक्षुरादिवत् इति प्रकटनार्थमिदं वचनम् । यदीदं तद्धेतुताया वचनम् । शास्त्रकारः परपक्षं स्थापयन् परसम्मति प्राक् प्रकाशयतीति भवेत् । [3b] परकथित प्रतिषेधाशयेन अर्थसिद्धिं दूषयन् तद्वचनं निक्षेपयति । तदैकान्तिकः पक्षोऽभ्युपेयते । अनैकान्तिकः परपक्षः सोऽनिष्ट इति शाङ्क्यते ।

पूर्वं[32] परं प्रति [यत्] अनैकान्तिकसाधनोद्भावनं, तदेव दूषणम् । कथं स्वपक्षे मिथ्यानुमानमनुकूलयसि ।। सर्वे वदन्ति अनैकान्तिकमनियतमसाधनम् । तत् संशयप्रापकमिति । अतः पुनः प्रमाणं स्थापयेत् । सम्भवेद्वा तत् अतदाभ इति अनिर्धारितस्वभावेषु परमाणुषु । यथाकारं विज्ञानमुत्पद्यत इति यन्निर्धारणं तस्यैवाभावात् स्पष्टं ज्ञायते तन्निर्धारणमपि नापततीति । अनिर्धारितस्वभाव इति वक्तव्यत्वात् । स कारण

नालम्बनम् इन्द्रियपरमाणुवत् इति केवलमायाति । सन्त्यन्ये पुनर्विज्ञानकारकविशेषाश्चक्षुर्विज्ञानसाधनानीति प्रदर्शिताः । न ते परमाणुरूपं प्रत्याययन्ति । अतदाकारत्वात् । अन्येन्द्रियविज्ञानवत्[33] । एवमन्यद्विज्ञानं[34] तद्विपर्ययेण वाच्यम् ।

इन्द्रियवदिति वचनं वस्तुतः प्रदर्शनार्थम् । दृष्टान्तान्तरमर्थापत्त्या आयाति । अथेदं कारणताभ्युपगमवचनं निष्प्रयोजनम्[35] । तस्य कारणवृत्तित्वेऽपि नालम्बनता । अयमप्येवमिति सार्थकम् । तथापि न शब्दादिपरमाणवोऽन्येन्द्रियविज्ञानजननकारणानि भवेयुः ।

कश्चिदाह[36]— न ज्ञाने स्थूलाभास इति । अतो नालम्बनम् इन्द्रियपरमाणुवत् । विज्ञाने विषयाकारार्पणाधीना हि तदाकारता । तदभावात् युक्तमुक्तं न स्थूलाभास इति । एवञ्च कथितं न परमाणवस्तदालम्बनम्[36a] इति । तस्य साधनं आकारयोगाभावात् । नापि प्रमाणसंसिद्धा विषयता ॥ १ ॥

तर्हि सङ्घातो विषयोऽस्तु[37] । उक्तभावानां स्थापनेन महापक्षं वाञ्छसि । तदा असिद्धता स्यात् इत्ययं न्यायः ।

2. [4] सङ्घातस्तदाकारवानपि इति ।
अयमालम्बनं सम्भवति । न [तस्य] कारणता ।
न तदाकाराद्विज्ञानमुत्पद्यत इति ।

सङ्घाताकारकविज्ञानस्य न सङ्घातो जनकः । न स एव तद्विज्ञानं जनयति । कथमिदं तत्प्रतीत्य भवति । आलम्बनलक्षणायोगात् नालम्बनमित्यर्थः । तेन पूर्वोक्ता तदाकारयोगयुक्तिर्न सिध्यति ।

तथाचेत् किमालम्बनस्य लक्षणम् । [आह—]

योऽर्थः[38] स्वाभासां विज्ञप्तिमुत्पादयति [स ह्यालम्बनं] युज्यत इति ।

यथाविषयं विज्ञानमिति य एव जनकः स एवालम्बनम्[39] । केचिदाहुः— योऽर्थ इति चित्तचैतसिकानां समुत्पादकारणं युज्यते । स समुत्पन्नो विषयवत् वेद्यमानः शब्देन व्यवह्रियते । तदोच्यते स आलम्बनार्थ इति । योऽर्थः[40] द्विविधाङ्गसम्पन्नः

स मिलितमालम्बनमुच्यते[41] । [यो] जनकः स आलम्बनविषयः [इत्यत्र] आगममुदाहरति[42]—

स उत्पत्तिप्रत्यय[43] उच्यत इति ।

अतो [यो] जननहेतुः स यद्विज्ञानस्योत्पत्तिप्रत्ययः । स तदालम्बनार्थः सम्मतः। [विज्ञाने][44] स्वाकारोऽवभासते । न तत्राधिकमस्तीत्यतः [विषयाकारता][44 a] नोक्ता ।

सङ्घातो नोत्पादकः । (2b) अद्रव्यत्वात् । इति ।

[4b] न हि सङ्घातो द्रव्यम् । तस्य सङ्घातिनामेकत्वान्यत्वामनिर्वचनीयत्वात् । न चाद्रव्यस्य सतः कार्योत्पादकशक्तिः सम्भवति ।

[2 b] द्विचन्द्रवत् इति ।

यथा द्वितीयश्चन्द्रः न द्वितीयचन्द्राकारविज्ञानजनकः । तथा चेत् किमुपादाय[45] तदाकारोऽवभासते । [आह–]

इन्द्रियवैकल्यादिति ।

यदा चक्षुरिन्द्रियं तिमिराद्युपहतप्रकाशम् तदा उपहतेन्द्रियस्य तत्र द्विचन्द्रदर्शनं भवति । न वस्तुविषयतः ।

तेन द्विचन्द्र[दर्शन]स्य तदाभत्वे
सत्यपि न तस्य विषयोऽस्ति । इति ।

यथा द्वितीयश्चन्द्रस्तद्विज्ञानस्य तदाकारवत्त्वेऽपि अनुत्पादकत्वान्न विषय इत्युच्यते ।

[46] तद्वत् सङ्घातो द्रव्यासत्त्वेन
तद्विज्ञानस्य न जननकारणम् इति ।
अद्रव्यत्वात्, द्वितीयचन्द्रवत् । तस्याकारणत्वात्
नालम्बनम् इति ।

द्विचन्द्रवत् इत्यावर्तते । अनेन पुनर्द्विचन्द्रदृष्ठान्तेन तदाकारताहेतोरनैकान्तिकदोष उक्त इति द्रष्टव्यम् । अथ विज्ञानरूपार्थस्य न्यायसिद्धत्वात् [5] विरोधदोषश्च । चक्षुः प्रतीत्य विज्ञानं, न नीलादिसङ्घातपरमाणून् । ततोऽजनितत्वात् [47] अन्येन्द्रियविज्ञानवत् । स दृष्टान्तः सर्वसम्मतः । अतो नान्य उच्यते ।

द्वितीयचन्द्रदृष्टान्तस्याद्रव्यत्वात् ज्ञातव्यं [48] तस्याकारणत्वे तत्साधयति । यथोक्तस्य साकारत्वेऽपि न स विषयः। इदं पुनः [49] तत्कारणत्वं विनास्ति ।

यदि नास्ति द्वितीयश्चन्द्रः । कथमाकारद्वयवत् प्रत्यक्षं भवति । तथाहि अन्तर्वर्ति-शक्तिविशेषक्रमेण तत्समानाकारं विज्ञानं प्रवर्तते । यथा सुप्तो विषयान् पश्यति । तदा-भासमिथ्याचेष्टास्तत्संविदश्च करोति । [एवं] तस्मिंश्चन्द्रे अन्यमारोप्य पश्यति । [50]

केचिदाहुः– [51] चक्षुर्विज्ञानेनोभयथा तदुपलम्भे तयोः क्रमस्य दुर्निर्णयत्वात् ऐकका-लिकमिति गृह्यते । तद्विविधाकारपाष्ठिकं मनोविज्ञानं भवति चन्द्रस्य द्वितीयं पश्यामीति ।

अन्ये केचिदाहुः— [एकत्वेन] सर्वसम्मते चन्द्रे सङ्ख्याविपर्ययः इन्द्रियवैक-ल्यात् इति । बाह्यार्थपक्षमनभ्युपगच्छतः तादृशस्थूलदृष्टिमृषाग्रह एव । नहि [52] चक्षुर्विज्ञानालम्बनसमनन्तरमुपनीतं मनोविज्ञानमेककाल एवोभयाकारमवलम्बते । तथा चन्द्रद्वयं पश्यामीति कथमध्यवसायः । शब्दादिषु तत्प्रतीत्य [मनो] विज्ञानम्, तत्क्रमाज्ञाने शब्दद्वयादिदर्शनमैककालिकं किं भवेत् । [53]

स्वस्थनेत्रस्य पुरुषस्य मनोविज्ञानं क्रमिकमेव भूयसा दुरध्यवसायम् । किं पुनः रूपेन्द्रियाश्रितविज्ञाने तद्विशेषपरिच्छेदे । तदा सिध्येद्भूयसा द्व्याकारादिदर्शनम् । एकश्चन्द्रो विज्ञानातिरिक्तो वस्तुसन् इति यदा स्वीकरोति । सोऽपि किं कृत्वा

चन्द्रद्वयं मृषा समारोप्य सङ्ख्याविपर्ययं [53a] वदेत् ॥ 2a-b ॥

विज्ञानविविक्तं [53b] बाह्यद्वयम् इति

[5b] परमाणुः सङ्घातश्च तयोरेकाङ्गवैकल्यात् यथोक्तस्थानखण्डनयुक्तिबलाच्च । स विषयो न युक्तः । एकाङ्गवैकल्यात् इति ।

स्वाकारप्रतिभास उत्पादकता चेति द्व्यङ्गमालम्बनम् । परमाणौ विकल-

53c
माद्यमङ्गम् । द्वितीये द्वितीयम् । यद्येवम्,यथापूर्वं विचारितं दोषद्वयं पुनरभेदं ग्राहयति ॥२॥

54
(3) सञ्चिताकारः [साधन] मितीच्छन्ति केचन इति ।

परमाणुषु प्रत्येकं सञ्चिताकारोऽस्ति । स सञ्चित एव विषयः साकारः प्रतिभासते । तदनुयायिनो विद्यमाना बह्वल्पपरमाणवः । ते सर्वे वस्तुसन्तः । परमाणुष्वस्ति सञ्चिताकारः स्वाकारविज्ञानजनकः । द्रव्यसत्त्वात् ।

55
आलम्बनं स्यात्

अस्य तु उभयाङ्गवत्वात् । स च पूर्वसिद्ध एव । अतो न जिज्ञासाऽवतरति सञ्चिताकारः परमाणुरेव किं वा न तथा इति ।

सर्वे ह्यर्था बह्वाकारा इति ।

ते परमाणव एवाण्वाकाराः सञ्चिताकाराश्चाभिमताः । कथं युज्येत एकं वस्तु सन्निविष्टमाकारद्वयवदिति । बह्वाकाराः सर्वभावा रूपसमवायरूपाः पृथिव्यादिचतुर्भूतात्मकाः । ते स्वभावतो विशिष्टशक्तिकाः ।

56
नीलवर्णाद्याकारः द्रव्यादिन्द्रियाच्च [6] प्रतिविज्ञायते । सोऽपि बह्वाकारेषु परमाणुषु

अस्ति सञ्चिताकारः ।

अस्यैवाकारस्य चक्षुरादिविज्ञानगोचरत्वात्

प्रत्यक्षत्वम् ।

57 58
यद्येवम् । अणूनां विज्ञानं सञ्चिताकारकमिति किं न ब्रवीषि । अणुः सञ्चिताकारः । कुतो न ब्रवीषि विज्ञानं सञ्चिताकारकमिति । अत आह-

परमाणुष्वस्ति सञ्चिताकार इति ।

59
इदमेव वचनं तत्प्रयोगात्मकं सत् प्रदर्शयति विज्ञानं परमाणुस-

60
ञ्चिताकारमित्यपि । तथा चेत् एकैकः परमाणुः त[त्स्वा]कारकः । कस्माद्ब्रवीषि सञ्चिताकारक इति ।

रूपसङ्घातपरमाणवो विभिन्नावयवा एतच्छास्त्राभिमता:[61] । ते सञ्चितत्वादेव न द्रव्यसन्त: इति यथावदुक्तमेव । किं कृत्वा पुनर्वचनम् । अस्त्याशयान्तरम् । वस्तुनि पृथक् पृथग्विभिन्नस्वरूपेऽपि स आकार: सञ्चितदेशमात्रे सन्निहित: । अत[स्तत्र] परिज्ञायते । तदा कथयन्ति सञ्चिताकार एवावलोक्यते नान्य इति । किञ्च[62] यद्यपि सर्वे भावा: परमाणुसङ्घातात्मका: । तथापि एकस्य वस्तुनोऽस्ति उत्कर्षापकर्ष: । यथावस्तु तत्पश्याम: । यथा च नीलं पृथिव्योत्यादिवचनं[62 a] तत्त्वतो न्याय्यम् । एवमभ्युपगमे[63] सति अतिरिक्तपदार्थस्यैवाद्योत्पत्तिकाले बहूनि वस्तूनि प्रबलानि तिरोधानं यान्ति । तिरोधानस्थलं[मिथ्या] निश्रित्य कृतोऽयं मृषाव्यवहारो[ननु]।

तथा[64] चेत् कथं परमाणवो नेन्द्रियग्राह्या: । कथञ्च पुनर्यथा-[र्थं]ज्ञानमात्रेण परमाणून् पश्यन्ति । [आह-]

[6b] अण्वाकारो[64a] न विज्ञप्तेरर्थं इति । (3c)

नायमिन्द्रियविज्ञप्तेर्विषय इत्यनिन्द्रिय इत्युच्यते । अनिन्द्रियोऽर्थश्च यथा[र्थ]ज्ञानचिन्त्य:। का पुन युक्ति: । नहि प्रत्यक्षत: परमाण्वाकारो दृष्ट: ।

कठिनतादिवत् । यथा काठिन्यशैत्यादि[65] ।

तत्र नीलत्वादिवस्तुसदपि न चक्षुरादिविज्ञप्तिविषय: । इन्द्रियशक्ते: प्रतिनियतत्वात् ।

एवमण्वाकारोऽपि । इति ।

न सर्वसम्मतिविरोध:[65a] । ननु अण्वाकारो[66] भातु । न कठिनता स्वभावान्तरत्वात् । तत्प्रति दशायतनसाधारण:[67] पक्षधर्मं इष्ट: । इदञ्च भूतमात्रम्[67a] इति तद्वचनमदुष्टम् । [अतो]युक्तमुक्तम् ॥ 3 ॥

(4) भवेद्घटशरावादे मति: इति ।

[7] एवं पश्यतस्ते घटे शरावे च निष्पन्नेन्द्रियबुद्धि: ।

समा दृश्यते ।

तत्स्वविषयविज्ञप्तौ भेदाभावात् । इन्द्रियबुद्धेः प्रत्युपस्थितविषयत आकारप्रवृत्तेश्च विज्ञप्तिविषयो न भिद्यते[68] कथं ज्ञायते ।

न घटशरावादीनां[69] बहुषु परमाणुषु विशेषोऽस्ति इति ।

इदं वचनमाह । परमाणवः सञ्चिताकारेण विषया भवन्ति । नैवास्ति तु तेषां घटादीनां स्वरूपप्रतिविज्ञप्तिकाले बहुषु अणुसङ्घातेषु प्रविभागः । तेषां वास्त्वाकाराद्बहिः पृथक् सञ्चित रूपस्यानुपलम्भात् । तत्प्रत्ययेन्द्रियविज्ञप्तिरभिन्नाकारा सिध्येत् । अनेनाणुस्वरूप आलम्बनता सिध्यति । न पुनस्तेषामवशिष्ट आकारे प्रत्यवमर्शप्रत्ययः[70] । नीलादि प्रतीत्येव संविदन्तरत्वात्[71] ॥4a-b ।

(4c) आकारभेदाद्भेद उच्यते चेत् । इति ।

आकारो बिम्बं भेदार्पकम् ।

घटशरावयो ग्रीवोदरपादा दिभि-

भिन्नाकारत्वात्

विषयवशेन विशिष्टा बुद्धिर्भवति भेदानुवर्तिनी च ।

सत्यं युज्यते ।

(4d) नेदं वस्तु इति ।

(7b) नेन्द्रियविज्ञप्तिदृष्टे विषये परमाणवो भेदवन्तः । यद्यपि स सङ्घातः संवृतिसन्। तथापि स सङ्घातो नेन्द्रियविज्ञप्तिविषयः स यदा विविच्यते। न हि युज्यते अविषयविशेषो भेदवद्विज्ञप्तिकारकः सम्भवतीति ।

कथं पुनर्ज्ञायते परमाणुषु आकारभेदो नास्तीति[72] । परमाण्वाकारे भेदाभावात् । सर्वे पदार्थाः सावयवाः इत्यवश्यं तत्राकारभेदः प्रवर्तते । परमाणूनां स्वरूपस्य तु नास्ति दिग्भागो यत्र निष्ठा प्राप्येत । [अतः] कथमस्याकारभेदो लभ्येत ।

घटशरावादिषु भिन्नवस्तुष्वपि

(5a) परमाणुस्वरूपे भेदो नास्ति ।

एकरूपस्यास्योपचयापचयाभावात् ।

ततोऽवधार्यते

(5b) सङ्घातेऽस्ति सः इति ।

न वस्तुभावे । सर्वं सदिग्भागमारोपिताकारं नेन्द्रियविज्ञप्तिगोचरः । एवं सन्ति पूर्वागतानि बहूनि खण्डनानि । अस्त्याकारभेद इति प्रदर्शनस्याभीप्सितत्वात् । नहि घटशरावादिबुद्धयो विभिन्नं वस्तु आलम्बनाय विषयीकुर्वन्ति । यथा सुखस्य दुःखस्य वा वेदनम् । तथाच परमाणवो न विषयभेदकाः । आकारोऽयं[8]न तद्विषयरूपः।

आकारभेदाद्भेद उच्यते चेत् (4c) इतोदं वचनं नाविशिष्टं वस्तु विषयो भवतीति प्रदर्शयितुमिष्टं सत् सिद्धसाधनं भवति।[73] ते ह्यभेग्ते परमाणवो विषयकृतो वस्तुतोऽभिन्नाः । तथापि आकारभेदाद्भेद इति । परमाणवोऽभिन्ना इति ममापि सम्मतम् । इदं सिद्धसाधनम् । परमाणूनां परिमाणभेदाभावात्(5a)

इतोदं वस्तुभेदोऽयंभेदक इति प्रदर्शनस्य असिद्धि प्रवक्ति । अथवा इदं द्य तयति घटशरावादिषु इन्द्रियविज्ञप्तीनां[74] परमाण्वाकारत्वाभावात् नालम्बनम् इति । यथान्यविज्ञानस्य । मनो वा अन्येन्द्रियविज्ञप्तिर्वा अन्यविज्ञानमुच्यते । नीलप्रत्ययकाले पीताकाराभावात् । परमाणूनां स्वरूपे बहून्यपि अविशेषात् इन्द्रियविज्ञप्तानाञ्चाविशेषाकारत्वात् इदं तावत् संसिध्यति- [आलम्बनप्रत्ययो] नाण्वाकृतिस्वरूप इति

[75-]श्लोके परमाणूनां विशेषवचनं [वा] पूर्ववत् पृष्ट्वा[76] प्रतिवक्तव्यम् । यदि तत्सङ्घाता[77] व्यत्यस्ताकार इष्ट इति । [स] आकारो न द्रव्यमिति न्यायतः साध्यम्।

एवं न्याय्यविशेषोऽयं साधयितव्यः। [इत्याह]–

(5c.d) अणूनां परिहार इत्यादि ।

यदा ते[ऽणवः] परिह्रियन्ते तदा तद्बुद्ध्यभावात् इति । सेनादिवत् । घटादि-

वचनमिदम् न वास्तविकोऽर्थः। तेन नास्ति वस्तुतः । पक्षान्तरप्रदर्शनमिदम्-अनद्र-
-75
व्याणि अतन्मुक्तानीति वस्तुविरुद्धम् । यथा शब्दादौ सति न नीलबुद्धिरस्ति । स आकारभेदो व्यत्यस्ताकारभूतः, घटादिविषयत्वात् इति । यद्यपि बहुकमाह्रियते । अन्यत् दृश्यत इति युक्तम् । तथापि परमाणूनां द्रव्याणां स्वरूपं सविशेषमिति प्रदर्शयितुमत्यन्तमशक्यम् ॥5॥

(6) [8b] [यत्] अन्तर्ज्ञेयरूपम् इति

स्वपक्ष आलम्बनवस्तु साधयति। यदि सामान्यतोऽपोह्यते नास्त्यालम्बनमिति । तदा लोकविरोधः स्वपक्षस्य दोषः । चत्वारः प्रत्यया इति सूत्र उपदिष्टत्वात् । तत्र अन्तःशब्दो विज्ञानाद्बिना आलम्बनं नास्तीति प्रदर्शनार्थम्। ज्ञेयाद ग्राह्यांशो विज्ञानपरिणामो ज्ञेयाकारोऽर्थ इति [प्रदर्शयति]। तथा विज्ञानगत ग्राह्यमिति विकल्पित विषयया स्थाप्यते। लोकविरोधदोषः पुनः पूर्ववद्वर्तते । लौकिकानां हि सम्मतं विषयस्य बहिर्वर्तन-मिति । [अत] उच्यते बहिव'दति । न विज्ञानं विना नास्ति । तस्य ग्राह्यांशः-

(6b) बहिर्वदवभासते ।

विषयमहं पश्यामीति वचनमाभिमानिकम् । वस्तुतस्तद्धेतुकम् यथा केशाद्यवभासि चाक्षुषं विज्ञानम् ।

78
बाह्यार्थो यद्यप्यसन् इति ।

अर्थात् वस्तुतो नास्ति तस्य बाह्योऽर्थः । अनुपलभ्यमानत्वात् । नहि युक्तिकाष्ठाव्यवसायेन उपलभ्यते तत्स्वरूपं नियमेन बहिवर्तत इति ॥

79
यद्यपि तत् वस्तुसत् बाह्यलक्षणम् । तथापि न विज्ञानप्रत्यय । अतदा-कारत्वात् । नहि परमाण्वाकारोऽवभासते ।

बाह्याकारवदवभासमानः स एव तदालम्बनप्रत्ययः । तदाकारयुक्तत्वात् । यत् [यदा]कारयुक्त तत् तदेव । यथा कारणत्वादिः स्वाकारयुक्तः । पुन[9] रालम्बनस्य स्वरूपविशेषं प्रदर्शयति । यथाह—

(6c) विज्ञानस्य तदाकारवत्त्वात् इत्यादि

असत् बाह्य वस्तु, अर्थो न भवतीति स्पष्टम् । यथावासनाकल्पितं विषयाकारोऽनुप्रवर्तते । नहि वासनाकल्पितं विज्ञानं मुक्त्वा बहिरस्ति ।

तद्विषयाकारो न विज्ञानं विनाऽऽदितोऽस्ति ।

तेन अन्तर्ज्ञेयरूपमित्युच्यते । तत्रान्तःशब्दो विज्ञानं विना नास्तीति वदति । तत् बहिः प्रकृतितोऽविद्यमानमन्तरिष्यते ।

[80] तत उत्पद्यते च इति ।

[81] स भाग उत्पादकः तत [एव] कदाचित् स्यात् । [82] सप्तमस्य पञ्चपदार्थेभ्यः सविशेषत्वात् । ज्ञेयं विना न तद्विज्ञानसत्ता लभ्यत इत्यत एततावद्विज्ञानजनकम् । [—82] न पञ्चम उच्यते ।

धर्मद्वयविशिष्टत्वात्

स्पष्टतरं तदेवालम्बनं न्याययुक्तत्वात् साधनञ्च प्रदर्श्यते । तदुभयलक्षणं ज्ञेयमेव साधनं भवति । यद्विशिष्टं [83] तद्विज्ञानं न बाह्यं वस्त्ववलम्बते । स्वप्नावस्थायामिदं प्रदर्शयितव्यम् । यथोक्तद्वितयमेकं साधनं भवति । विज्ञानं तदाकारवत् विज्ञानजनकञ्चेति । इमे द्वे वृत्ती प्रतीत्य एकं प्रमाणं सिध्यति ।

[9b] तदन्तःरूपमेवेति ' स्वीकारेऽपि

बाह्यार्थस्य मिथ्याभूतलक्षणस्य परीक्षितत्वादेव [84] नास्त्यन्यलक्षणम् इत्युक्तम् । यथावासनाकल्पनं हि [85] विषयस्तद्वेदनां जनयति । विषयाकारस्तु अन्तर्वर्तत इति न्याय्यं भविष्यति ।

[86] कथं तदेकांशः सहजातस्य प्रत्ययः ।

तद्ग्राह्यांशस्य विज्ञानं विनाऽभावात् तदेकांशः पुनर्विज्ञानं जनयति । तदा सिध्येत् स्वात्मविरोधदोषः । पुनस्तदेकांशत्वात् । ग्राहकांशवत् । तदाह्यस्य जनकता नैव सिध्यति । वाह्याकारविलष्टमेव विज्ञानं प्रवर्तते । स एकैकांशो विज्ञानसहजातः नद्वयोः समकालीनयोः कार्यकारणभावोऽस्ति । यथा गोः शृङ्गद्वयम् । न चारित तदभिन्नं वस्तु एककालं सहवर्तते इति । सहशब्दः तत्संयोगवाची । नापि विज्ञानात्पृथग्विषयोऽस्तीत्युच्यते । अस्य तावत् कथंसहजातत्वमित्याख्या ।

सत्यमेवम् । तथापि आकारविभागबलाद्भिन्नं[87] कृत्वा निरुच्यते । दर्शनांशाकारांशभिन्नमस्तीति तत् विज्ञानं सविशेषमित्यायाति । यद्येवम्[88], प्रत्ययरूपं ग्राह्यमात्रं स्यात् । न विकल्पितं वस्तु सस्वभावकम् । तस्य तावदप्रत्ययत्वं सिध्येत् । इदमविरुद्धम् । अन्यग्राह्यविभिन्नविषय[वत्] अयं प्रत्यय इति सर्वसम्मतम् । यथा समनन्तरनिरोधः सभागे विज्ञाने निरुद्धे तदेव विज्ञानं चतुर्भिः प्रत्ययैः प्रत्ययो भवति[89] ।।

## Notes
## to
## Dharmapala's Tika.

There are two Sub-commentaries in Chinese, not included in Nanjio's Catalogue. One by Shomen, Ming-yu belonging to the Ming period and to Shu province= Szechwan, and the other by chih-hsu, popularly called Ou-i, born 1597 and died in 1654 A C. (v. Fu-hsueh tzu-tien=Dictionary of Buddhist forms p. 1383). In the following notes I have given excerpts from these two Sub-commentaries, read in Sanskrit bearing upon the obscure passages of Dharmapala's Tīka, Ming-yu's comment is referred to hereafter as C.I and Chih-hsu's one as C.II. References quoted below are to folio-number. obverse (=a) colunms 1 and 2 and reverse (=b) columns 1 and 2.

1. C.I.: दुर्मेधा इति अव्यक्तप्रज्ञः पुरुषः। अव्यक्तप्रज्ञया चित्ताद्बहिरर्थं गृह्णाति । धर्मकायञ्च हन्ति । प्रज्ञाजीवितञ्च ध्वंसयति । अतो दुर्मेधाः । त्रिषु दोषेषु (lit. विषेषु) मोहविषं परिपूर्णम् कामविषस्यैको भागः । बाह्यार्थस्य कामांशसम्बन्धित्वात् । कथं द्वेषांशो नोक्तः। स कामसंयुक्तः। अर्थे रागः (lit. तृष्णासंक्लेशः) एवास्ति । न तं विद्वेषयति । अतो नास्ति द्वेषः । (f. 184a, l).

2. हेयं—तीर्थिकगृहीतपरमाणुसंघातरूपद्विविधार्थः । [तस्य] नियमेनासत्वात् माहायानिकः तं खण्डयित्वा त्यजति । उपदेयं- तीर्थिकस्यानिष्टः द्वयाकारबद्धविज्ञानजननवादः । अर्थेऽभ्रमात् महायानमापाततस्तं स्वीकरोति । एवं हेयस्य हानमुपादेयस्योपादानम् । ..... तत्र परमाणु–सङ्घातरूपद्विविधबाह्यवस्तुग्रहस्त्याज्यः । विपरीतहेतुप्रदर्शनेन तद्गहीतपरमाणुसङ्घातवस्तुग्रहं खण्डेत । तद्वस्तुग्रहखण्डनेन नालम्बनप्रत्ययं [तद्वस्तु] [स्वी-] कुर्मः । चित्ताद्बहिर्नास्ति धर्म इत्यपि प्रदर्शयेत ।—C.II, p.200b, 2.

3. अन्ययानिका अपि स्वीकुर्वन्ति मनोविज्ञानं संवृतिसदालम्बते इति । रथादिप्रज्ञप्तिधर्मावलम्बित्वात् । ते यद्यपि स्वीकुर्वन्ति मनोविज्ञानं वस्तुविषयं प्रतीत्य साकारमिति । [अथ च] मनोविज्ञानाकारविनाभूतं तद्ग्राह्यबाह्यविषयमपि मस्तके वहतीति ।—C.II, 201a, 1.

3[a]. Lit. सभागम् । *pien-fen* (91, 18-2)

4. *Pu-chi-yin-chin* (61-10,61-13); *yin-chin,* attentive, particular about

5. रूपमिति संज्ञादृष्टौ प्रज्ञप्तिपरमाणुरूपमेव । *Tan-chia* (30-5-162-5)=तर्केति-मनोविज्ञाननिर्देशः । इदं रूपं मनोविज्ञानस्यालम्बनमिति परपक्षः । प्रत्युत आह-न वस्तुतो मनोविज्ञानस्य गोचर इति । –C.I. (184b. 2).

6. ••••••• ज्ञानस्य विषय इति । ज्ञानं षष्ठं मनोविज्ञानमेव । विषयः श्रुतचिन्ताविषयः ie. इदं मनोविज्ञानं श्रवणगृहीतात् विषयात् जातम् । स विषय एवालम्बनं द्रष्टव्यम् । श्रुतचिन्ताविषयो मनोविज्ञानजनक इत्येव द्रष्टव्यमित्याशयः । एवं द्रष्टव्यमिति मनोविज्ञानं तद्विषयमात्रमवलम्बत इति प्रदर्शनार्थम् । Ibid.

7. स्वं=परमाणुः, कलापः=सङ्घातः । मनोविज्ञानं न परमाणु सङ्घातं वा विषयमवलम्बते । Ibid.

8. अनन्तरमिति—मनोविज्ञानमवश्यं पञ्चविज्ञानानन्तरमुत्पद्यते । [यदि] नाभ्युपैषि—पञ्चविज्ञानैः समालम्बनमिति । तदा मनोविज्ञानमवश्यं निरुद्धपञ्चविषयानवलम्बते । तत्र दूषणमाह—यद्यतीतमनागतञ्च वस्तुसत् । तदा [तत्] सम्भवेत् ।—c.I.185a 1

9. मनोविज्ञानेन पञ्चविषयविज्ञाने [गृहीते] सति उत्पादकमिन्द्रियं पृथक् भवति । अतो न पञ्चेन्द्रियैः समं पञ्चविषयानवलम्बते । तदा अधिकरूपं कस्मात् भवति । अधिकरूपमिति—पञ्च विषयाः प्रत्येकं स्वलक्षणानि । न्यायतः पञ्चविज्ञानानि आलम्बनकाले शुद्धान् विषयान् गृह्णन्ति । इदमेव प्रत्यक्षं स्वलक्षणमात्रप्रापकम् । मनोविज्ञानमालम्बनकाले न्यायतोऽधिकरूपं दीर्घह्रस्ववृत्तपरिमण्डललक्षण [मवलम्ब्य] प्रवर्तते । स्वलक्षणप्रतिद्वन्द्वितयोक्तमधिकरूपम् । न पञ्चालम्बनसमम् । स्वलक्षणमेव नास्ति । किं पुनरधिकरूपम् ॥

अनुमानमिति— यथा दृष्टम्—(इयं) पृथिवी । अनुमेयं कठिनता । दृष्टम् आपः । अनुमेयं—स्नेहः । दृष्टम्—तेजः । अनुमेयं—औष्ण्यम् । दृष्टम्—वायुः । अनुमेयं—ईरणम् । अयमनुमानन्यायोऽवश्यमधिकरूपाभ्युपगममपेक्षते । अधिकरूपं प्रतिषिद्धमेव । अनुमानन्यायोऽवश्यं विरुध्यते ।—C. I ff 18: a 2 —185 b, 1·

10. इदं मन [इन्द्रियं]-प्रकृतितो नास्ति । अविज्ञप्तिरूपस्य विज्ञानजनकत्वाभावात् Ibid.

11. परमाणुरालम्बनं प्रत्यक्षभावीति । ते पाक्षिकताग्रहं प्रतिपद्यन्ते । कुपथपरिभ्रमणञ्च । शास्त्रे प्रमाणस्थापनम्, [तेन] आलम्बनप्रतिषेध एव सम्यङ् मतम् । तदा आश्रयता प्रतिषिध्यते । आलम्बनप्रत्ययः—अयमेक एव धर्मो विज्ञानजनक आलम्बनीक्रियते । तदालम्बनताया एव प्रतिषेधे कथमस्तीयमाश्रयता ।—C.I,185 b,2

12. Vide Hsuan Tsang's version ad ver. 8. for clear exposition of this point.

12a. This whole para has no parallel in Vinītadeva's Tīkā

13 शास्त्रकारोऽनुमानेन दोषान्तरं प्रदर्शयिष्यति । अतो न विचारयति चित्ताद्बाह्यधर्मसत्तादोषम्—C.I, 186a, 1.

14. पञ्चगुणाः (=पञ्चविषयाः) प्रत्येकं विभिन्नाकाराः—Ibid. चक्षू रूपं गृह्णाति श्रोत्रं शब्दं गृह्णाति ·· ·· कायः स्पष्टव्यं गृह्णाति । तानि व्यवच्छिन्नशक्तिकानीत्युच्यन्ते ।—C.II.202a,2.

14 a. अत्र प्रमाणम्—परमाणुर्धर्मी । आलम्बनार्थः पक्षः (=साध्यः) तत्कारणत्वात्—हेतुः। तथा समदृष्टान्तो नास्ति ।—C.II.202b, 1.

15. Cfr. Ślokavārtika, p.285; उत्पादकस्यैवालम्बनत्वम् । Pramānavārtika, II.244: हेतुभावादृते नान्या ग्राह्यता नाम काचन । also v. verses : 248, 368.

15a. तत्र प्रमाणमाह— सङ्घातो धर्मी । विज्ञानस्यालम्बनमिति पक्षः (=साध्यः) विज्ञानाकारजनकत्वात्—हेतुः । समदृष्टान्तस्तु नास्ति । —C.II.202b, 1.

16. The same in the Pra. vārtika, II, 224: तत्र बुद्धिर्यदाकारा तस्यास्तद्ग्राह्यमुच्यते । Vṛtti: ग्राह्यमुच्यते अणुसञ्चयः ।

17. The following is according to C. I. and to be applied after vṛtti ad ver. 1. (Hsuan Tsang's version). Here *hetu*—पक्षहेतुदृष्टान्तत्र्यवयवमनुमानम् — C. I. 186 b, 2.

17a -17 a. पक्षः=साध्यः, हेतुः साधनम्। हेतुः योज्यः दृष्टान्तो योजकः। अधुना तयोर्द्वयोर्वादियोः प्रत्येकं हेतुः प्रदर्श्यते। समो दृष्टान्तस्तु नास्ति। आपाततो यद्येकविधहेतोर्नोक्तः। हेतुद्वयस्यापि दृष्टान्तो नास्ति। तद्यथा हेतुनैव हेतुस्वभावः साध्यते। पक्षेणैव पक्षस्वभावः साध्यते। तेनोक्तपरमाणुसामान्यलक्षण-द्वैविध्येनैव अयमालम्बनस्वभावः साध्यते। हेतुयोजनाय दृष्टान्तो नास्ति। पक्ष-साधनाय हेतुर्नास्ति। अतो द्वौ वादावयुक्तौ।—C. II. 202b. 2.

18. Or हेत्वादयः।

19. C.I ...... स्वशासनं नाभ्युपैति विज्ञानाद्बाह्यवस्तुप्रत्यय इति। यदि बाह्यं रूपमालम्बनीक्रियते। इदं स्वशासनविरुद्धम्। (f 187a, 1)

C. II. — . आत्मन इष्टमन्तराकारभागरूपमालम्बनप्रत्यय इति। न विज्ञानात् बाह्य [मेव] वस्तुप्रत्यय इति। तदा विज्ञानाद्बहिरस्ति वस्तु इति संशयो [भवति]। "स्वात्मविरोधदोषः स्यात्"। तथा अन्तराकारभागरूपधर्मे अन्ययानिका अनभ्युपगमं कीर्तयन्ति। (f. 203 a, 1)

Note: According to this C. II. the reading will be: स्वात्मविरोध - for धर्मिस्वरूपविरोध - and धर्मेऽनभ्युपगमं...for...धर्मो ।

20. महायानिकपक्षो नाभ्युपैति बाह्यरूपं पञ्चविज्ञानानामालम्बनप्रत्यय इति— C. I. 187 a,2. C. II's interpretation is noted in the previous note. The expression 'Fa-chêng(85-5,115-9) is well-known translation of the name *Dharmakīrti* v. m. vyutpatti;

21. Chien - liang - i (18-7, 166-5, 61-9). C. I. take in this context to mean *anumāna* as in a previous passage, See note 17.

C. II. पूर्वोक्तान्ययानिकपूर्वप्रमाण (=पूर्वपक्ष) मभिसन्धायाह—तेषां वादमूलं आकारबाहिविज्ञानजननहेतुद्वयम्, इदं हेतुप्रकाशनमात्रनिदानम्। त्रिषु अवयवेषु नायं हेतुरेव, साधारणसिद्धदृष्टान्ताभावेन हेत्वसिद्धः। (f.203 a.1.)

22. प्रत्येकं समदृष्टान्तो नास्ति। Ibid.

23. See at the end of this introductory *vṛtti,* p. 113.

23 a Lit. ग्राकारवत् ···· ।

24. तदाकारसमानं विज्ञानमुदेति । अयं विषयो विज्ञानजनकशक्तिकः प्रत्यय इत्युच्यते । C.I. 188 a,1.

24 a Lit. ग्रनुवर्तनात् etc.

25. Lit. कि संभवति ?

26. Lit. तं ·······अर्पयति ।

27. प्रतिबिम्बवत् । ······ परमाणुरादर्शकल्पः । तदुत्पन्नं विज्ञानमादर्शदृष्टप्रतिबिम्बकल्पम् । –C.I. 188 a,2. This seems to be wrong. C. 11. 202, b.2:-तदात्मनि as विज्ञाने. So *vijñāna* must be conside red as ग्रादर्शकल्प.

28. Lit. तेन.

29. lit. कारणार्थे.

30. तथा चायमभिप्रायः । परमाणुस्वरूपस्य न केवलं कारणत्वम्, आलम्बनलक्षणमपि उपलभ्यम् – अध्यासः । तदिन्द्रियमपि आलम्बनलक्षणं भविष्यति–लक्षणदूषणम् । यदि पूर्वोक्तहेतुः साधनं भविष्यति । तदा कारणत्वात कुत आलम्बनतास्ति । [त]दिन्द्रियस्याप्यस्ति इति अनैकान्तिकदोषः सिध्यति । –खण्डनम् - C. I. 188 b,1-2

31. कुतो न साक्षात्खण्डयसि चित्राद्बहिर्नान्यः परमाणुरस्तीति । किन्त्वाह–अतदाभतयेति । तदर्थः कः । उच्यते । चित्ताद्बहिर्नास्ति धर्म इति स्वप्रतिज्ञास्थापनार्थम् । चित्ताद्बहिरस्ति धर्म इति परपक्षे न दोषकथनार्थम् । ··· शास्त्रकारः पूर्वं परपक्षं स्थापयति न वस्तुतः । परसम्मतिप्रकाशनं तुलनामात्रम् । तदा परालम्बनाभाव [रूप] प्रतिषेधमभिप्रैति । ततः प्रदर्शितेनानेन तत्सिद्धार्थखण्डनं चिकीर्षति । ग्रतः तदभ्युपगतं वचनमध्यस्य निक्षिपति । प्राय इदानीं [त]त्पक्षधर्मस्थापनं तन्नियमनियतमेकमर्थमापाततः पूर्वमभ्युपैति । यत् प्रायः परपक्षनियतं तस्य ममापि ग्रनभ्युपगमात् । C. II. 204 a,2.

32. शास्त्रकारस्थापितमनुमानं पूर्वमित्युच्यते । शास्त्र उक्तमुभयं न न्यायः । [य]दनैकान्तदोषसिद्धिरुक्ता तदेव खण्डनम् । कथं etc. ॥ सर्वे वदन्ति etc. इदं पूर्वप्रश्नोत्तरम्, ie: अनैकान्तिकमवश्यमनियतमसाधनम् । यदनैकान्तिकं तदवश्यं संशयप्रापकम् । अतः शास्त्रकारोऽवश्यं पुनस्तन्नियतमनुमानं स्थापयत् । सम्भवेद्वा तत्स्थापितमनुमानम् । अतत् (=परमाण्वा)भ इति । तेन (–Causing) तेषु परमाणुषु अनिर्धारित विषय इति ज्ञातेषु । यथाकारं विज्ञानमुत्पद्यत इति यन्निर्धारणम् इति । ie. परमाणुरनिर्धारितविषय इति मन्यते । सूक्तं परमाणुविज्ञानजनकं इति । अतः पूर्वपक्ष आह तदाकारसमं विज्ञानमुत्पद्यत इति । तदाकारानुविधानात् तदा तद्विषयवेदनम् । तस्यैवाभावात् स्पष्टं ज्ञायते निर्धारणमिति ie. स परमाणुरेव न विज्ञानजनकः । सुज्ञायते निर्धारणं न परमाणाविति । अतो नालम्बनं क्रियते । ······ वक्तव्यत्वात् ie. यदि पुनरनुमानं न समीक्रियते न हेतोरवकाशस्तदा । अनिर्धारितस्वभावः परमाणुरिति खण्डनम्-C. I. 189 a,1-2. According to C. II पूर्वं etc. प्रश्नः । सर्वे वदन्ति etc. उत्तरम् । सम्भवेद्वा तत्परमाणुः अतत् – चक्षुरादिपञ्चविज्ञानालम्बन – आभ इति । परमाणुषु etc. इदं परखण्डनमात्रम् । अथ स्वानुमानानुकूलनम्—यथाकार······निर्धारणम् । नहि तानि पञ्चविज्ञानानि यथापरमाण्वाकाराणि दृष्टानि । अतः स्पष्टं ज्ञायते ··· ·· वक्तव्यत्वात् । (f. 204b, 1)

33. Ie.अन्येंद्रियविज्ञानं शब्दं गन्धं रसं स्पर्शं वावलम्बते । इति रूपलक्षणपरमाणुरालम्बनं भवतीति सुलब्धम् । – C.I 189b, 1

34. अन्यद्विज्ञानं न चक्षुर्विज्ञानसमानम् । चक्षुर्विज्ञानं रूपालम्बनम् । अन्यद्विज्ञानं रूपलक्षणमालम्बते । Ibid..

35. स परमाणुः कारणवृत्तिरपि नैवालम्बनम् । यद्यस्य अन्यविज्ञानस्य परमाणुरुत्पत्तिहेतुरपि । सुतरामिष्टं परमाणुर्वस्तुतः पञ्चविज्ञानानामुत्पादक इति । खण्डनम्–तथा न शब्दगन्धरसस्पर्शेषु विद्यमानपरमाणुरूपाकारा अन्येन्द्रियविज्ञानोत्पत्तिकारणानि भवेयुः । यदेव न विज्ञानजनकं न [त]दालम्बनकरम् । Ibid.

36. According to C.I. and C.II.this sentence is applicable to Diñnaga's vṛtti on the second verse.

36 a. See vṛtti on ver. 1 this should be in syllogistic form as

attested by Vinïtadeva, v. his tïkā, Page No. 22. English translation. n. 14.

37. भाव=परमाणु: सङ्घात इति धर्मद्वयम् । महापाक्ष—महायानम्, mo-a,(149-11,17o-5) =महा. C.I. 190 a, 1.

38. सर्वे पञ्चविज्ञानविषयाः न्यायतः पञ्चविषयाभासपञ्चविज्ञानजनकाः । चक्षुषा रूपे प्रतिहते रूपविषयाभविज्ञानमुत्पद्यते । यथारूपं नामस्थापनम् । etc. C. I, 190 b.1.

39. एक एव धर्मः शक्तिद्वयवान् । स विज्ञानोत्पत्तिहेतुः आलम्बनकृत् । तदभिप्रायः— न केवलं महायानस्याभिमतम् । हीनयानिकस्यापि । तत्प्रमाणमुदाहरति–केचिदाहुः etc. अर्थो नाम······युज्यत इति । इदं प्रतिपादयति न बाह्यरूपमालम्बनप्रत्ययताकृत् इति । स उत्पन्न ··· उच्यते । आलम्बनार्थं इति विवृणोति एक एव धर्मः जनकालम्बन[रूप] द्विविधशक्तिसम्पन्न इति । अतः सिद्धान्तयति—योऽर्थः etc. Ibid.

40. अयं सिद्धान्तः । अङ्ग=lit. लक्षण.

41. That Sutra explains so.

42. आगम इति हीनयानिकमहायानिकानां सूत्रम् – Ibid,

43. =विज्ञानं यत (lit. ततः) उत्पद्यते तत्विषयमवलम्बते । अतः etc. व्याख्या–अतो यो जननहेतुः etc.

44. इमानि त्रीणि [पूर्वं] वाक्यानि प्रतिपादयन्ति – तन्निकायस्य सम्मतं-लक्षणद्वयवत् आलम्बनकृत् इति C.I. 190 b,2. Read Vinïtadeva's tïkā.

44 a. On the basis of the same Tïkā.

44 b Cf. Dignaga's Syllogism: नान्योऽवयवी–अवयवेभ्यः तुलानतिविशेषाग्रहणात्—In Pra. var. vṛtti ad IV 152.

45. अर्थं प्रश्नः– द्वितीयश्चन्द्रः सङ्घातसमः । सङ्घातधर्मः परमाणुसिद्धप्रज्ञप्तिरिति ज्ञातः । प्रज्ञप्तिसत् चन्द्रद्वयलक्षणं किमुपादायास्ति ।—C.I,191 a,1.

46. तद्वत् etc. in accordance with Tib. but Hsuan Tsang interprets. तस्य द्रव्यतो नास्तीति । etc.

47. =श्रोत्रादिविज्ञानं न रूपलक्षणमालम्बते । इति जनानां ज्ञातं सम्मतम् । इदं दृष्टान्तयति – चक्षुर्विज्ञानं न नीलादिसमुत्पन्नम् । न च नीलाद्यालम्बते इति । यथान्यविज्ञानं न रूपलक्षणमर्थमालम्बते,नापि रूपलक्षणसमुत्पन्नम् । C.I,191b,1.

48. [अनेन] दृष्टान्तेन बाह्यरूपं न वस्तु । किन्तु विज्ञानाजनकत्वेऽपि तत्साधयति अयमध्यासः । – Ibid.

49. इदं बचनं – यथोक्तस्य ·····विषय इति वचनम् । तत्कारणत्व (or–अर्थं) विना नालम्बन [ता] लभ्यते । – Ibid.

50. चन्द्रारोपसदृशमवशिष्टसङ्घातज्ञानम् । इदमपि मनोविज्ञानालम्बनम् । को मियतं गृह्यते चक्षुर्विज्ञानस्यार्थः ।– C.I.191 b, 2.

51. इदं चन्द्रलक्षणम् । तत्र चाक्षुषविज्ञानस्य पूर्वोत्तरक्षणयोरूपलम्भकाले, तयोः क्रमस्य दुर्निर्णयत्वात् ऐककालिकता क्रियते । अतः तत्क्षणपूर्वोत्तरचाक्षुषविज्ञानम् । तद्वि-वित्ताकारमनोविज्ञानम् etc. C. II. 206 b, 2.

52. ज्ञातव्यं न केवलं चन्द्रद्वयं चाक्षुषविज्ञानस्य विषयः मनोविज्ञानस्यापि न विषयः इति । यदि चन्द्रद्वयग्रहः अज्ञातक्रमं मनोविज्ञानम् । तदा शब्दे श्रोत्रविज्ञानं······ स्प्रष्टव्ये कायविज्ञानं तत्प्रतीत्य मनोविज्ञानमज्ञातक्रमम् । शब्दद्वयस्य ······ स्प्रष्टव्यद्वयस्य दर्शनमपि ऐककालिकं किं न भवेत् ? । तद्यथा घण्टाशब्दश्रवणम् । एकं शब्दं शृण्वन् न पुर्वोत्तरक्षणे युगपच्छब्दाध्यवसायं करोति । कथं केवलं चन्द्रे चद्रद्वयस्य युगपदुपलम्भाध्यवमायं करोति । – C.II.207 a,1.

53. अतः क्षणिके धर्मे नित्याभासैकाभासदृष्टिं करोति । किं पुनः रूपेन्द्रियाश्रितचक्षुर्बिज्ञाने तत्क्षणपूर्वोत्तरक्षणविशेषान् परिगणयतीति । तदा बत सिध्येत् भूयसा द्व्याकारादिदर्शनम् । Ibid. Here punctuation is according to C. II.

53 a. According to Vinitadeva here also Dharmapāla has

formulated *a prayoga*, but we miss it in Chinese version.

53.b. kār. 2c.

53.c. विषयविज्ञानयोरिति शेषः ।

54. Or वदन्ति । kār. 3 ab.

55. Not in the Tib. Text.

56. Lit. द्रव्यमनुसृत्य इन्द्रियमनुसृत्य

57. अणुष्वुत्पन्नं चक्षुरादिविज्ञानम् C.I. 193 a, 2.

58. अणोरस्ति सञ्चिताकारः । स एव वदेत् विज्ञानस्य सञ्चिताकारोऽपि दृश्य इति । Ibid.

59. प्रयोगेण प्रदर्शयति — इन्द्रियविज्ञानमालम्बनताप्रापकपरमाणुसञ्चिताकारकम् इति । Ibid

60. परपक्षा[न]भ्युपगमतः खण्डनम्—यदि स (सञ्चिताकार) एव परमाण्वाकारः सञ्चिताकारो नोपलभ्येत । तदुभयं न युगपद्वर्तते । Ibid.

61. Śāstra of the two previous schools.

62. पुनः परपक्षकल्पनाप्रकटनम् ······ दृष्टान्तमाहरति—यथा etc. नीलरूपमात्रं नीलरूपं दृष्ट्वा जानाति पृथिवीधातुरिति । तस्य नीलरूपमुत्कृष्टम् । पृथिवीधातुरपकृष्टः । तत्त्वतो न्याय्यमिति । तयोरुत्कर्षापकर्षवचनं सिद्धान्तः ।—C.I, 193 b, 1-2

62 a. Lit नीलरूपं पृथिवी धातुः ।

63. दृष्टान्तखण्डनम् — अतिरिक्तवस्तुनः प्रथमोत्पत्तिकाले तदन्यवस्तूनि प्रबलानि प्रथमोत्पत्तिकरक्तवस्तु न तिरोधापयति । तिरोधानस्थल etc ie.

एकत्र रक्तवस्तूत्पत्तिकाले [तदन्यवस्तूनि] तिरोधापयति, तान्यदृश्यानि करोति। भवतः पक्षमभ्युपगम्य कृतोऽयमुत्कर्षापकर्षवचनमिथ्याव्यवहारः। ie. अयं परस्य पक्ष—परमाणुरपकृष्टः सङ्घात (or सञ्चित) उत्कृष्टः। उत्कृष्टेनापकृष्टस्तिरस्क्रियते। अतो नावश्यं परमाणुदर्शनसंरक्षणम् इति। अतो धर्मपालाचार्य [आह]—रक्तवस्तुदृष्टान्तेन परमाणोरपकर्षेऽपि [अन्यानि] बहूनि वस्तूनि प्रबलोत्कृष्टानि न तिरोधातुं शक्यानि इति। – C.I,193 b,2. सम्भवस्थलं मृषा समाश्रित्य कृतोऽयं किं नु खलु मिथ्याव्यवहारः, C. II.208 a.1.

64. Ie. यदि रक्तवस्तुदृष्टान्तेन परमाणुदर्शनं संरक्ष्यते। भवतो महायाने कथं वचनं भवति—परमाणूनां स्वरूपं न चक्षुर्विज्ञानदृश्यमिति। कथञ्च पुनः etc. ie. भवतो महायाने पुनर्वचनम्—परमाणुपरीक्षकमनोविज्ञान [रूप] यथाभूतज्ञानमात्रं [तत्] पश्यतीति। अयं मनोविज्ञानविकल्पो मृषादर्शनम्। — Ibid.

64. a Kār. 3-cd. अण्वाकारः–सञ्चिताकारः cfr. Hsuan Tsang's version and C.II. under nn. 67–68.

65. कठिन्यशैत्यादि=काठिन्यशैत्यौष्ण्येरणानि चत्वारः स्वभावाश्चतुर्णां महाभूतानां बीजानि न चक्षुरादिविज्ञानदृश्यानि। – C.I.194 a, 1.cp. my. Pañcavastuka, p.2.

65. a, =सर्वसम्मतार्थविरोधः–C.II.208, a,2.

66. More. lit. किं नाणुः प्रकाशते ? न कठिनता। ie. चक्षुर्विज्ञाने न [अवभासते] कठिनता। चक्षुर्विज्ञानाच्च नास्ति परमाणुभिन्नः। परमाणुर्मृषावासनाकल्पितमात्रं न कठिनतावस्तुसद्बीजसमानम्। – C.I, 194 a,1.

67. Ie. अस्मिन् विज्ञानमात्रपक्षे पूर्वाभ्युपगतकाठिन्यशैत्यादि विकारकं भवति। इन्द्रियाणवो दशायतनानि विकृतानि। विकारकं बीजमेव। विकृतं तदाकार भाग (hsieng-fen, 109-4,18-2) एव। बीजेन (विकृत) आकारभागः चित्तमात्रदृश्यः। अत आह तद्वचनं etc. C.194a,2.

दूषणम्—कठिनतादिना दृष्टान्तयामि परमाणुगतसञ्चितं। कथं नेच्छसि परमाणौ नास्ति कठिनतेति प्रदर्श्य कठिनताभाव[ञ्च] ग्रहीतुं, सञ्चितसत्ताप्रतिषेधाय। दृष्टान्तद्राष्टान्तिकयोर्भेदात्। ततावत्सर्वसम्पतार्थविरुद्धम्। उत्तरम्—तत्प्रत्ययोऽपि नालम्बनमिति (v. h. s version). पक्षधर्मः अन्तरिन्द्रियबाह्यविषयदशायतनरूपं स्वीकृतमपि महाभूतसिद्धं महाभूतमेव। कथं लभ्यते

सञ्चितमात्रमस्ति न काठिन्यं स्नेहः । अतो ज्ञायते दृष्टान्तद्राष्टान्तिकौ नावश्यं भिन्नौ । C II. 208, a, 2.

67 a. This is the Sautrantika's opinion, v. Pañcavastuka, Intro p.VII.

68. The above punctuation is according to the Chinese text. But C.I and C II construe this sentence with the following.

69. Lit. —दिषु. No case-ending after *paramāṇu*. प्रविभाग: lit. खण्ड:, भाग: pien-fen(91. 18-2)

70. Fu-shen (146-12,40-12)- प्रत्यवमर्शः ? C.I. अवशिष्ट आकारे = परमाणोरभिन्न आकारे । [न] प्रत्यवमर्शप्रत्ययः परमाणुस्वरूपेण घटशरावो निवृतः । परमाणुदर्शनरिरक्षायामवश्यमयं प्रत्ययो गृण्यते । f. 195 a,2,ll.1-3.

71. See Eng.translation, note. 39.

72. No case ending in Chinesekār, 4d.

73. Vaiśesikas ?

74. परमाणुस्वरूपमभिन्नमेव । घटशरावादयो भिन्ना अपि नालम्बनम् । C.I.196 a,2.

75– 75. श्लोक आह–'परमाणुपरिमाणसाम्यात्' (5 a) आकारभेदः प्रज्ञप्तिमात्रवर्ती । पूर्ववत् पृष्ट्वा प्रतितक्तव्यमिति । पूर्वभाग आह– कथं पुनर्जायते परमाणुषु नास्त्याकारभेद इति अयं प्रश्नः । परमाण्वाकारे भेदाभावात्– इदं प्रतिवचनम् । यदि तत्सत्सङ्घातः······न्यायतः साध्यम्- इदं व्याख्याति पूर्वपदद्वयम् ie. यदि ते जानन्ति परमाणुपरिमाणः समः । [त] दाकारोऽभिन्नः सङ्घाताकारो व्यत्यस्तः । सङ्घाताकारश्च प्रज्ञप्ति [रूपः] न वस्तु इति । अयं सम्यङ्न्यायः । अत आह सम्यङ्न्यायः साधयितव्यः अणूनां परिहार इत्यादि । ··· ·· सेनादिवत्– इदं व्याख्याति उत्तरपदद्वयम् । परिहारः = अपोहः । ie. आकारभेदे उत्पद्यमानबुद्ध्याकारोऽपि भिद्यते । यावत्परमाणु तदाकारापोहे उत्पद्यमानबुद्ध्याकारो नियमेन न भवति ।

अतः स्वतो व्याख्याति – इदं घटादिवचनं वस्तुविरुद्धम् । सामान्यतः [अयं] परपक्षसिद्धान्तः । अद्रव्यवस्तु अनद्रव्यवस्तु च विरुद्धम् । अद्रव्यवस्तु घटादि अनद्रव्यवस्तु परमाणुः । ie. घटादिविरोधदुष्टः इत्यनेन प्रदर्शित एव परमाणुरपि विरोधदुष्ट इति । घटादिरद्रव्यं नालम्बनप्रत्ययो लभ्यते । परमाणुर्द्रव्यमपि नालम्बनप्रत्ययो लभ्यते । C.I.196 b, 1.

76. Lit. पूर्वतुल्य, –सम

77. Or. व्यवहित·

78. See Hsuan Tsang's version.

79. Tsung - ling - hsü (120-12, 9-3, 149-4).

80. आलम्बकं विज्ञानं आकारभागादर्थादुत्पद्यते – C. II. 210

81-81. स भाग उत्पादकः=स आकारभागो नियमेन पूर्वं सत्वात् (भागः)विज्ञानजनकः । भागे नियमेन सत्यपि विज्ञानोत्पत्तिकाल एवाकारभागस्य पृथग्दर्शनात् । तत एव कदाचित् स्यादिति=पूर्वोदाहरणे वासनाकल्पितं ज्ञेयं प्रवर्तते, इदं तस्मादाकारात् क्लिष्टं [मनो] विज्ञानं प्रवर्तते । अत आह- तत इति । कदाचित् स्यादिति -अर्थानुवर्तने आकारोऽनुवर्तते । ततः पृथक् प्रवर्तते । य आकारभागो विज्ञानेन सहोत्पन्नः । अयमाकारोऽर्थाद्भवति । य एकाकी ज्ञेयाकारः, स आकारभागमाश्रित्य क्लिष्टविज्ञानपरिणामोऽवभासते । अकारभागदेवोत्पद्यते । अयमुत्पन्नार्थात् [भवति] ।। षष्ठस्य पश्चार्थेभ्यः सविशेषत्वात् इति=पूर्वपश्चाकारभागाः वस्तुसन्तो बीजानि जनकानि वस्तुस्वभावज्ञेया इत्युच्यन्ते । षष्ठ आकारभागः क्लिष्टबाह्याकारजनकः केवलज्ञेयाकार इत्युच्यते । अतोऽस्ति विशेषः । पूर्वं पूर्वपश्चसम्यागर्थान् व्याख्यातुमाह- ज्ञेयं बिना न तद्विज्ञानसत्ता लभ्यत इति=नाकारभाग- ज्ञेयं बिना विज्ञानालम्बनं लभ्यते । अत एतत्रावद्विज्ञानजनकम् ।=एतदाकारभाग- ज्ञेयं तावत् सुतरां विज्ञानजननमाक्षिपति ।। न पश्चम उच्यत इति । पूर्वं पश्चमः शब्दोऽर्थः – न विपक्षेण (i-pien=different catagory) मन इष्टकथनं क्रियते । (This explanation of *pañcama* is not very clear)- C.I.198 a, 2-b, 1.

82. This reading of *saptama* is adopted in the Nanking edition of the text. So also in C.II. But. C. I. reads *ṣaṣṭha* as noted in the previous note. The seventh

consciousness is,according to Yogācāra. *kliṣṭam manas.* *V.* Śatadharma-vidya– Appendix to the Pañcavastuka.

83. तद्विज्ञानं *(pi-jo-nam)* = विज्ञानस्कन्धः = मनोविज्ञानम् । ......स्वप्नावस्थायां प्रकाशमानमिति = स्वप्ने प्रत्ययोऽर्थो न बाह्यं वस्तु प्रकाशेत चान्तर्ज्ञेयाकारः । - C.I. f.19ͬ b. 2.

84. Read *ta* (9-3) for *ti* (32-3) of the text as in the C.I.

85. Or ज्ञेयम्.

86. सहजातस्य is supported by C.I.

87. आलयविज्ञाने भागद्वयं सहोत्पद्यमानं दृष्टम् । अत आहविभाग इति । भेदं कृत्वा निरुध्यत इति ie. विज्ञानं धर्मद्वयमादावनाम जनयति । आर्या एव दर्शनाकारभेदाय परिच्छेदं कल्पयंति [?] । दर्शनांशाकारांशभिन्नं ···· ie. आलयविज्ञानस्वरुपमादौ तथता दर्शनांशाकारांशभिन्नम् । तत्प्रदर्शयति आलय-विज्ञानं भेदं जनयतीति । – C.I.199a,2.

88. यद्येवं दर्शनांशाकारांशौ [भिन्नौ] कृत्वा निरुच्यत इति । तदा प्रत्ययरूपं ····· ···· । – C.II. 210b, 1.

89. C.II.remarks at the end thus: The rest is not commented on: or the original text has not come down, or the establishing the *Ālambana pratyaya* is finished. Therefore no need to comment on.